© 2017 IJSRST | Volume 3 | Issue 1 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X
International Journal of Scientific Research in Science and Technology

# स्मृतिसाहित्ये परिवेशविज्ञानम्



**डा.सुधांशुशेखरमहापात्र,**
सहाचार्यः, धर्मशास्त्रविभागः,
राष्ट्रियसस्कृतविद्यापीठम् ,तिरुपतिः

**सारांश :-** स्मृतिसाहित्ये वृक्षच्छेदनस्य निषेधदर्शनात् तद्रोपणस्य नरकनिवृत्तिदर्शनाच्च प्रकृतेर्भारसाम्यरक्षाकरणाय परिवेशस्य सुरक्षायै च या व्यवस्था कृता तया जगतो महत्कल्याणमेव साधयिष्यत इत्यत्र नास्ति काचन विचिकित्सा। अतस्तदनुसारेण यदि सर्वे वर्तेरन् तर्हि परिवेशस्य सुरक्षाऽवश्यम्भाविनीति वक्तुं शक्यते। तत्र स्मृतिसाहित्ये कासुचित् स्मृतिषु स्थालीपुलाकन्यायेन परिवेशविज्ञानविषये यद् विचारितं तत्सर्वं मयात्र प्रतिपाद्यते।

स्मर्यत इति व्युत्पत्त्या स्मृतिशब्दो यौगिकत्वेन संस्कृतभाषया लिखितानि सर्वाणि शास्त्राण्येव बोधयति। परन्तु श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिरिति [1]मनुवचनात्स्मृतिशब्दो धर्मशास्त्रे परिभाषितः। यौगिकापेक्षया परिभाषाया बलवत्वात् स्मृतिशब्देन धर्मशास्त्रमेव बोध्यते। तदेव धर्मशास्त्रमतीव विशालम्। वेदानन्तरं तद् वेदवद् धर्मे प्रमाणत्वेन सर्वैः स्वीक्रियते। तद्धर्मशास्त्रसाहित्यं शैलीभेदेन ऐतिहासिकैः त्रेधा विभक्तम्। स्मृतिसाहित्यं, सूत्रसाहित्यं, निबन्धसाहित्यञ्चेति।

तत्रादौ परिवेशस्तु परिधिरित्यमरकोषानुसारेण[2] परिवेशशब्दः चतुष्पार्श्वं बोधयति। परितो विष्यतेऽनेति व्युत्पत्त्या पर्युपसर्गाद् 'विष' धातोर्घञ्प्रत्यये कृते परिवेशशब्दो निष्पद्यते। अत्र परिवेशशब्दो मूर्द्धण्यान्तो दृश्यते। वेष्टने परिवेशः स्याद्भानौ सविधमण्डले' इत्यत्र परिवेशशब्दस्य तालव्यान्तत्वमपि दृश्यते। पुनश्च 'मण्डलं परिवेशश्च परिधिश्चोपसूर्यकमिति' भागुरि[3] वचनादपि परिवेशशब्दः तालव्यान्तो ज्ञायते। यद्भवतु परिवेशशब्दः परिवेशशब्दश्चोभावेव पारिपार्श्विकस्थितिं बोधयतः। एतेनास्माकं चतुष्पार्श्वेषु विद्यमाना प्राणिजातयः उद्भिदश्च परिवेशशब्देन व्यवह्रियन्ते। परिवेशो दूषितश्चेत् शुद्धमन्नं शुद्धजलं श्वासप्रश्वासानुकूलो वायुश्च नैव सुलभाः स्युः येन मानवस्यास्तित्वमपि नश्येत्। प्रकृतिरेव परिवेशस्य जननी। प्रकृतीनां तुष्टिद्वारा परिवेशः शान्तो मधुमयो भोगयोग्यः सुरक्षितश्च भवति, अन्यथा विनाशाय कल्प्येत। तस्माद् भारतीयधर्मशास्त्रेषु परिवेशसुरक्षार्थं नाना व्यवस्था विहिता। धर्मशास्त्रे स्मृतिसाहित्यं प्राचीनतमम् । स्मृतिसाहित्ये मनुस्मृतेः प्राथम्यं प्राधान्यञ्च [4]छान्दोग्यब्राह्मणे श्रूयते यत्- मनुर्वै यत्किञ्चिदवदत् तद्भेषजं भेषजताया इति। पुनश्च बृहस्पतिवचनमुद्धृत्य तस्यामेव [5]मन्वर्थमुक्तावल्यां प्रदर्शितं यत् नाप्युक्तं प्रसङ्गेऽस्मिन्नुक्तं यत्-

**वेदार्थोपनिबद्धत्वात्प्राधान्यं हि मनोः स्मृतम् ।।**
**मन्वर्थविपरीता तु या स्मृतिः सा न शस्यते ।**
**तावच्छास्त्राणि शोभन्ते तर्कव्याकरणानि च ।**
**धर्मार्थमोक्षोपदेष्टा मनुर्यावन्न दृश्यते।।इति।।**

एतावता मनुस्मृतिः सर्वासु स्मृतिषु प्राचीनतमा प्रधानीभूता चेति न कापि विप्रतिपत्तिः। तस्यामेव मनुस्म ृतौ याज्ञवल्क ्यस्मृतौ च परिवेशविज्ञानविषये या व्यवस्था विद्यते , तद्विषये मया किञ्चिदत्रालोच्यते।

परिवेशसुरक्षार्थं मनुस्मृतौ पञ्चमहाभूतानां क्षित्यप्तेजोवाय्वाकाशानां सृष्टिरुपासना च विहिता। स्वयमेव परमात्मा जगतोऽन्धकार दूरीकृत्य महाभूतानि प्रादुश्चकार । प्रसङ्गेऽस्मिन् [६]मनुनोक्तं यत्-

**ततः स्वयम्भूभगवानव्यक्तं व्यञ्जयन्निदम्।**
**महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः।। इति।।**

एतानि पञ्चमहाभूतानि प्रकृतिरूपेण पूजितानि भवन्ति। तेषु आकाशमवकाशं ददाति, वायुः श्वासप्रश्वासानुकूलमम्लजानं, तेजः प्रकाशार्थं पाकार्थञ्चाऽग्निं , जलं शस्योत्पत्तये जीवनार्थञ्च रसं, पृथिवी वासार्थं स्थानं ददाति , येन सर्वे प्राणिन ः उद्भिदश्च जीवितुमर्हन्ति। अत्रैवं बोद्धव्यं यत् परमात्मना स्वमनसो विकारादेव प्रथमतः शब्दगुणविशिष्टस्याऽऽकाशस्य सृष्टिः कृता। ततः आकाशात् स्पर्शमन्तं वायुं, ततो वायुतः जगत्प्रकाशकं तेजः, तेजसः रसवतीः आपः, ततश्च जलादेव गन्धवत्याः पृतिव्याः सृष्टिरभूत्। अस्मिन् प्रसङ्गे [७]मनुना प्रतिपादितं यत् –

**मनः सृष्टिं विकुरुते चोद्यमानं सिसृक्षया**
**आकाशं जायते तस्मात्तस्य शब्दगुणं विदुः।।**
**आकाशात्तु विकुर्वाणात्सर्वगन्धवहः शुचिः।**
**बलवान् जायते वायुः स वै स्पर्शगुणो मतः।।**
**वायोरपि विकुर्वाणाद् विरोचिष्णुस्तमोनुदं ।**
**ज्योतिरुत्पद्यते भास्वत् तद्रूपगुणमुच्यते।**
**ज्योतिषश्च विकुर्वाणादापो रसगुणाः स्मृताः।**
**अद्भ्यो गन्धगुणा भूमिरित्येषा सृष्टिरादितः।।इति।।**

एतेषु पञ्चमहाभूतेषु जलस्य वायोश्चावश्यकता जरायुजाण्डज-स्वेदजोद्भिज्जादिचतुर्विधानां प्राणिनां संजीवनार्थं सुतरां वर्त्तते। तत्रापि उद्भिज्जा यमम्लजानसंज्ञकं वायुं त्यजन्ति, तेन जरायुजाः जीवन्ति। जरायुजाश्च यमङ्गारकाम्लाख्यं पवनं त्यजन्ति तेन उद्भिजाः खाद्यं गृह्णन्ति। एवं प्रकारेण ते परस्परमुपकारका एव भवन्ति। यदि जलं दूषितं यदि वा वायुः प्रदुषितः स्यात्, तर्हि समग्रः परिवेशो दूषितो भवति, येन प्राणिनां जीवनमपि सङ्कटापन्नं भवति। प्राचीना ऋषयः जलवायुवृक्षलतादीनां प्रकृतिरूपाणां परिवेशभूतानां तत्त्वानां यथा प्रकोपो न स्यात्तदर्थं शान्तिसूक्तान्यपि परिकल्पितवन्तः। तद्यथा-ॐ द्यौः शान्तिः, अन्तरिक्षं शान्तिः, पृतिवी शान्तिः, आपः शान्तिः, औषधयः शान्तिः वनस्पतयः शान्तिः, शान्तिरेव शान्तिरित्यादि। एतावता सूक्तपाठेनपरिवेशस्यशान्तिः भारसाम्यञ्च सञ्जायते। भगवता मनुना गृहस्थस्य कृते पञ्चमहायज्ञानामनुष्ठानमनिवार्यत्वेन विहितम् । ते च यथा प्रतिपादिताः [८]मनुना-

**अहुतश्च हुतश्चैव तथा प्रहुतमेव च ।**
**ब्राह्म्यं हुतं प्राशितञ्च पञ्चयज्ञान् प्रचक्षते।। इति।।**

मनुना गृहस्थस्य पञ्चमहायज्ञानामनुष्ठानमनिवार्यमिति प्रतिपादितम्। यदि ते पञ्चमहायज्ञानामनुष्ठानं न कुर्युः तर्हि पञ्चसूनाग्रस्ता भवन्ति। अतो गृहस्थः प्रतिदिनं ब्रह्मयज्ञं , देवयज्ञं, पितृयज्ञं, मनुष्ययज्ञं, भूतयज्ञञ्चानुतिष्ठेत्। एतेषु यो देवयज्ञः क्रियते, तत्र सायं प्रातः अग्नौ हवनकरणात् होमकुण्डोत्थितो धूमः आकाशं प्राप्य वृष्टिं कारयति, तेन वृष्टिजलेन अन्नं सम्भवति यद् भुक्त्वा प्राणिनो जीवितुमर्हन्ति। प्रसङ्गेऽस्मिन् [९]मनुनोक्तं यत्-

**अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते।**
**आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः।। इति।।**

जलस्य वायोश्च प्रदूषणनिषेधार्थमपि मनुना व्यवस्था कृता। यतो हि तेन जले मलमूत्रोत्सर्जनं न कर्त्तमुपदेशः प्रदत्तः। जलं वस्त्रेण उत्पूय पिबेदित्यादिना च जलं प्रदूषणमुक्तं कर्तुं तेन व्यवस्था विहिता। यथोक्तं तेन- [१०]नाप्सु मूत्रं पुरीषं वेत्यादि, [११]वस्त्रपूतं जलं पिबेदित्यादि। पुनश्च महायन्त्राणां प्रवर्त्तनं, सर्वेष्वाकरेष्वधिकारः, औषधीनां हिंसा, इन्धनार्थं द्रुमच्छेदादिकर्मणामुपपातकत्वेन निर्देशात्, कृते च प्रायश्चित्तस्मारणात् तेषां सर्वथा निषेधो मनुना कृतः। अन्यथा तद्द्वारा परिवेशस्य महती क्षतिः सम्भाव्यते। प्रसङ्गेऽस्मिन् [१२]मनुनोक्तं यत् –

**सर्वाकरेष्वधिकारो महायन्त्रप्रवर्तनम् ।**
**हिंसौषधीनां स्त्राजीवोऽभिचारः मूलकर्म च ।।**
**इन्धनार्थमशुष्काणां द्रुमाणामवपानम् ।**
**आत्मार्थञ्च क्रियारम्भो निन्दितान्नादनं तथा।।इति।।**

योऽम्लजानादिसंज्ञको विशुद्धो वायुः प्राणिनां श्वासप्रश्वासानुकूलो भवति स वृक्षादिभ्यः प्राप्यते। अत एव वृक्षा मनुष्याणां जीवनधारणस्योपायभूताइत्यत्र नास्ति संशयः। यथा प्राणिनो वृक्षाणामभावे जीवितुं नार्हन्ति, तथा स्थावरा वृक्षा अपि प्राणिनामभावे विना जीवितुं न शक्नुवन्ति। अतो भगवता स्थावरजङ्गमात्मका प्राणिनः परस्परं निर्भरशीलान् कृत्वा सृष्टाः। अतो मानवा यदि तेषां वृक्षाणां रोपणं रक्षणञ्च न कुर्युः तर्हि तेषामपि रक्षणं न स्यात्। न केवलं वृक्षा अम्लजानाख्यपवनदानेन मानवानुपकुर्वन्ति, अपि तु स्निग्धच्छायादानेन, देवार्चनार्थं पुष्पादिदानेन भोजनार्थं फलदानेन, पाकार्थमिन्धनदानेन, गृहोपकरणार्थं, कृष्युपकरणार्थञ्च काष्ठदानेन रोगनिरा करणार्थं मूलफलपत्ररसाद्यौषधदानेन परिधानार्थं वल्कलदानेन, यज्ञानुष्ठानार्थं सृक् स्रुवप्रोक्षणीस्फयाधुपकरणदानेन चोपकुर्वन्ति। एतेन ज्ञायते यत् मनुष्या वृक्षादीन् विना न कथमपि स्थातुमर्हन्ति। मनुष्याणां संख्या यथा यथा बर्द्धते तथा तथा वृक्षाणां संख्या यदि न बर्द्धत, तर्हि परिवेशस्य भारसाम्यं न स्यात्। तस्माद् जगत्कल्याणाय मन्वादिमहर्षिभिः वृक्षाणां रोपणाय न केवलमुपदेश: प्रदत्तः, अपि तु तेषां छेदने दण्डस्य प्रायश्चित्तस्याऽपि व्यवस्था कृता । पुनश्च अशुष्काणां वृक्षाणां छेदने प्रायश्चित्तं दण्डस्य च विधानं मनुना कृतम्। अत एव प्रसङ्गेऽस्मिन् यथोक्तं [१३]मनुना -

**फलदानां तु वृक्षाणां छेदने जप्यमृक् शतम् ।**
**गुल्मवल्लीलतानाञ्च पुष्पितानाञ्च वीरुधाम् ।।इति।।**

अपि च[१४]

**वनस्पतीनां सर्वेषामुपभोगो यथायथा ।**
**तथा तथा दमः कार्यो हिंसायामिति धारणा।।इति।।**

पुनश्च प्रसङ्गेऽस्मिन् योगीश्वरेण [१५]याज्ञवल्क्येन व्यवहाराध्याये वृक्ष-तच्छाखादिच्छेदने च राजदण्डोऽ प्युक्तः। तद्यथा-

**प्ररोहिशाखिनां शाखास्कन्धसर्वविदारणे ।**
**उपजीव्यद्रुमाणाञ्च विंशेतर्द्विगुणो दमः।।**
**चैत्यश्मशानसीमासु पुण्यस्थाने सुरालये ।**
**जातद्रुमाणां द्विगुणो दमो वृक्षे च विश्रुते।।**
**गुल्मगुच्छक्षुपलताप्रतानौषधीवीरुधां ।**
**पूर्वस्मृतादर्द्धदण्ड स्थानेषूक्तेषु कर्त्तने।। इति।।**

वृक्षाणां हिंसाविषये निषेधं कृत्वा तेषां रोपणविषये सुरक्षाविषये च धर्मशास्त्रेऽपि व्यवस्था वर्तते। [१६]शब्दकल्पद्रुमकारेण वराहपुराणवचनमुद्धृत्य वृक्षरोपणद्वारा नरकगमनादपि निवृत्तिर्भवितुमर्हतीति प्रतिपादितम्। तद्यथा-

**अश्वत्थ एक पिचुमर्द एको द्वौ चम्पको त्रीणि च केशराणि।**
**सप्ताथ ताला नव नारिकेला पञ्चाम्ररोपी नरकं न याति।। इति।।**

पुनश्च प्रसङ्गेऽस्मिन् वङ्गीयनिबन्धकारेण रघुनन्दनभट्टाचार्येण [१७]तिथितत्त्वे प्रतिपादितम्। तद्यथा-

**अश्वत्थमेकं पिचुमर्दमेकं न्यग्रोधमेकं दशपुष्पजातीः।**
**द्वे द्वे तथा दाडिममातुलाङ्गे पञ्चाम्ररोपी नरकं न याति।। इति।।**

पुनश्च बह्निपुराणवचनमुत्थाप्य वृक्षरोपणप्रसङ्गे [१८]श्रीदेवयानपत्रिकायां प्रतिपादितं यत् फलपुष्पादिवृक्षाणां रोपणेन नरो नरकगमनात् मुक्तोऽपि भवितुर्महति। तद्यथा-

**छायापुष्पोपगां स्त्रिंशत् फलपुष्पद्रुमांस्तथा।**
**रोपयित्वा दशैतांस्तु न नरो नरकं व्रजेत् ।। इति।।।**

अपि च [१९]विष्णुस्मृतौ फलपुष्पादियुक्तवृक्षाणां छेदने तच्छेदनानुरूपा उत्तमसाहस-मध्यमसाहस-पूर्वसाहसादि दण्डा: प्राप्यन्त इति प्रातपातिम्। तद्यथा-फलभोगद्रुमच्छेदी तूत्तमसाहसं, पुष्पभोगद्रुमच्छेदी मध्यमं, वल्लीगुल्मलतादिच्छेदी कार्षापणशतं तृणच्छेदी कार्षापणमेकञ्च दण्डरूपेण लभन्ते। एवं रीत्या स्मृतिसाहित्य पुराणेषु च वृक्षरोपणद्वारा पापक्षय-

पुण्यप्राप्तिस्तथाऽकरणे च नरकनिवृत्तिदर्शनेन प्रकारान्तरेण प्राचीनैर्मुनिभिः वृक्षरोपणद्वारा यज्ञाद्यनुष्ठानद्वारा च परिवेशस्य सुरक्षा समुपदिष्टा। तदनुसारेण यदि वयं सर्वे तानेव नियमान् परिपाल्य परिवेशस्य सुरक्षां कर्तुं प्रभविष्यामः तर्हि सर्वं सामञ्जसं स्यात् ।

**पादटिप्पणी**

१.म.स्मृ. -२-१०
२.अ.को. -१-३-३२
३.अ.को. -पृ.-५३
४.मन्वर्थमुक्तावली- पृ.-२
५.मन्वर्थमुक्तावली- पृ.-२
६.म .स्मृ -१-६
७.म .स्मृ. -१/७५-७८
८.म .स्मृ -३/७३
९. म .स्मृ. -३-७६
१०.म स्मृ. -४-५६
११.म .स्मृ. -६-४६
१२.म स्मृ -११/६३-६४
१३.म .स्मृ. -११/१४२
१४.म स्मृ. -८-२८५
१५.या स्मृ. -व्य./२२७-२२९
१६.श .क. द्रु. काण्ड.-४- पृ. -४७६
१७.ध.शा.स. पृ. -१२५
१८.श्री.दे.प.-पृ. (१९७६-७७)-पृ.-४
१९.श्री.दे.प.-पृ. (१९७६-७७)-पृ.-५

**सन्दर्भग्रन्थसूची**


१.अमरकोषः - चौखम्बा संस्कृत सीरिज आफीस, वाराणसी, १९३२

२.धर्मशास्त्रसन्दर्भः- रमाप्रेस्, पुरी, २००८

३.मनुस्मृतिः - चौखम्बा संस्कृत संस्थान, वाराणसी, २००३

४.मन्वर्थमुक्तावली - चौखम्बा संस्कृत संस्थान, वाराणसी, २००३

५.याज्ञवल्क्यस्मृतिः - नागप्रकाशन, दिल्ली, १९८५

६.शब्दकल्पद्रुमः - चौखम्बासंस्कृत सीरिज अफिस, वारणसी, १९४७

७.श्रीदेवयानपत्रिका - नारायण प्रेस, पुरी, १९७४-७५